22E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहि:स्थ**

**परीक्षा : मे– २०२५**

**सत्र ६ वे**

**विषयः वेणीसंहार (22E465)**

**दिनांक :** १९/०५/२०२५ **गुण :**१०० **वेळ : स.** १०.०० ते १.००

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. स्वभाषया अनुवादं कुरुत। चतुर्णाम्** (२४)

१. तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां, वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु।।

२. आ शस्त्रग्रहणादकुण्ठपरशोस्तस्यापि जेता मुनेस्तापायास्य न पाण्डुसूनुभिरयं भीष्मः शरैः शायितः।
प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो बालस्यायमरातिलून–धनुषः प्रीतोऽभिमन्योर्वधात्।।

३. धर्मात्मजं प्रतियमौ च कथैव नास्ति मध्ये मध्ये वृकोदरकिरीटभृतोर्बलेन।
एकोऽपि विस्फुरितमण्डलचापचक्रं कः सिन्धुराजमभिषेणयितुं समर्थः।।

४. यदि समरमपास्य नास्ति मृत्योर्भ्यमिति युक्तमितोऽन्यतः प्रयातुम्।
अथ मरणमवश्यमेव जन्तोः किमिति मुधा मलिनं यशः कुरुध्वे।।

५. एह्यस्मदर्थहततात परिष्वजस्व क्लान्तैरिदं मम निरन्तरमङ्गमङ्गैः।
स्पर्शस्तवैष भुजयोः पितुस्ते शोकेऽपि यो महति निर्वृतिमादधाति।।

६. पर्याप्तनेत्रमचिरोदितचन्द्रकान्तमुद्भिद्यमाननवयौवनरम्यशोभाम्।
प्राणापहारपरिवर्तितदृष्टि दृष्टं कर्णेन तत्कथमिवाननपङ्कजं ते।।

**प्र.२. वेणीसंहारनाटकस्य मूलाधारः कः? तत्र लेखकेन संहितायां किं किं परिवर्तनं कृतम?** (१६)

**अथवा**

**सविस्तरं लिखत– वेणीसंहारनाटकस्य कालः कर्ता च। नाटकस्य वेणीसंहारम् नाम स्पष्टयत।**

**प्र.३. स्वमतं प्रकटयत – (नाट्यमधिकृत्य) कर्ण–अश्वत्थाम्नोः कलहः।** (१५)

**अथवा**

**द्रौपद्याः तथा भानुमतेः स्वभावचित्रणं कुरुत।**

**प्र.४. ससन्दर्भं स्पष्टीकुरुत– (पञ्च)** (३०)

१. न खलु न खल्वमङ्गलानि चिन्तयितुमर्हन्ति भवन्तः कौरवाणाम्।
२. दीव्यताक्षैस्तदानेन नूनं तदपि हारितम्।
३. तत्कस्मादिदानीमपि ते केशाः न संयम्यन्ते।
४. कुतोऽद्यापि ते तातः।
५. दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्।
६. न घटस्य कूपपतने रज्जुस्तत्रैव प्रक्षेप्तव्या।
७. न युक्तमनभिवाद्य गुरून् गन्तुम्।

**प्र.५. सोदाहरणं स्पष्टीकुरुत–(त्रीणि)** (१५)

नान्दीश्लोकः    प्रवेशकः विष्कंभकः च    भीमद्रौपदीसंवादः    पताकास्थानम्

----------